# MukundamAlAstotram by Kulashekhara Versions 1 and 2

# મુકુન્દમાલાસ્તોત્રમ્ કુલશેખરવિરચિતમ્ સંસ્કરણ્ ૧ અથવા ૨

## Document Information

Text title : mukundamAlAstotra kulashekhara

File name : mukundamAlA.itx

Category : vishhnu, krishna, stotra, vishnu

Location : doc_vishhnu

Author : kulashekhara

Transliterated by : GM original modified and proofread as per mukundamAlA by Ravindra Seth in Hindi available at DLI.

Proofread by : Proofread by Madhavi U mupadrasta at gmail.com, KSR

Description-comments : There are two variants to this stotra found in

Latest update : December 1, 2012

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 24, 2024

*sanskritdocuments.org*

MukundamAlAstotram by Kulashekhara Versions 1 and 2

# મુકુન્દમાલાસ્તોત્રમ્ કુલશેખરવિરચિતમ્ સંસ્કરણ્ ૧ અથવા ૨

સંસ્કરણ્ - ૧ શ્લોક સંખ્યા ૪૦

શ્રીવલ્લભેતિ વરદેતિ દયાપરેતિ
ભક્તપ્રિયેતિ ભવલુણ્ઠનકોવિદેતિ ।
નાથેતિ નાગશયનેતિ જગન્નિવાસેત્ય્
આલાપિનં પ્રતિદિનં કુરુ માં મુકુન્દ ॥ ૧॥

જયતુ જયતુ દેવો દેવકીનન્દનોઽયં
જયતુ જયતુ કૃષ્ણો વૃષ્ણિવંશપ્રદીપઃ ।
જયતુ જયતુ મેઘશ્યામલઃ કોમલાઙ્ગો
જયતુ જયતુ પૃથ્વીભારનાશો મુકુન્દઃ ॥ ૨॥ ॥ કા ૨॥

મુકુન્દ મૂર્ધ્ના પ્રણિપત્ય યાચે
ભવન્તમેકાન્તમિયન્તમર્થમ્ ।
અવિસ્મૃતિસ્ત્વચ્ચરણારવિન્દે
ભવે ભવે મેઽસ્તુ ભવત્પ્રસાદાત્ ॥ ૩॥ ॥ કા ૩॥

નાહં વન્દે તવ ચરણયોર્દ્વન્દ્વમદ્વન્દ્વહેતોઃ
કુમ્ભીપાકં ગુરુમપિ હરે નારકં નાપનેતુમ્ ।
રમ્યારામામૃદુતનુલતા નન્દને નાપિ રન્તું
ભાવે ભાવે હૃદયભવને ભાવયેયં ભવન્તમ્ ॥ ૪॥ ॥ કા ૫॥

નાસ્થા ધર્મે ન વસુનિચયે નૈવ કામોપભોગે
યદ્ ભાવ્યં તદ્ ભવતુ ભગવન્પૂર્વકર્માનુરૂપમ્ ।
એતત્પ્રાર્થ્યં મમ બહુમતં જન્મજન્માન્તરેઽપિ
ત્વત્પાદામ્ભોરુહયુગગતા નિશ્ચલા ભક્તિરસ્તુ ॥ ૫॥ ॥ કા ૬॥

દિવિ વા ભુવિ વા મમાસ્તુ વાસો
નરકે વા નરકાન્તક પ્રકામમ્ ।

અવધીરિતશારદારવિન્દૌ
ચરણૌ તે મરણેઽપિ ચિન્તયામિ ॥ ૬॥ ॥ કા ૭॥

કૃષ્ણ ત્વદીયપદપઙ્કજપઞ્જરાન્તં
અદ્યૈવ મે વિશતુ માનસરાજહંસઃ ।
પ્રાણપ્રયાણસમયે કફવાતપિત્તૈઃ
કણ્ઠાવરોધનવિધૌ સ્મરણં કુતસ્તે ॥ ૭॥

ચિન્તયામિ હરિમેવ સન્તતં
મન્દહાસમુદિતાનનામ્બુજં
નન્દગોપતનયં પરાત્ પરં
નારદાદિમુનિવૃન્દવન્દિતમ્ ॥ ૮॥

કરચરણસરોજે કાન્તિમન્નેત્રમીને
શ્રમમુષિ ભુજવીચિવ્યાકુલેઽગાધમાર્ગે ।
હરિસરસિ વિગાહ્યાપીય તેજોજલૌઘં
ભવમરુપરિખિન્નઃ ક્લેશમદ્ય ત્યજામિ ॥ ૯॥

સરસિજનયને સશઙ્ખચક્રે
મુરભિદિ મા વિરમસ્વ ચિત્ત રન્તુમ્ ।    var  વિરમેહ
સુખતરમપરં ન જાતુ જાને  var  સુખકર
હરિચરણસ્મરણામૃતેન તુલ્યમ્ ॥ ૧૦॥ ॥ કા ૮॥

માભીર્મન્દમનો વિચિન્ત્ય બહુધા યામીશ્ચિરં યાતનાઃ   var  માભૈર્મન્દમનો
નામી નઃ પ્રભવન્તિ પાપરિપવઃ સ્વામી નનુ શ્રીધરઃ ।
આલસ્યં વ્યપનીય ભક્તિસુલભં ધ્યાયસ્વ નારાયણં
લોકસ્ય વ્યસનાપનોદનકરો દાસસ્ય કિં ન ક્ષમઃ ॥ ૧૧॥ ॥ કા ૯॥

ભવજલધિગતાનાં દ્વન્દ્વવાતાહતાનાં
સુતદુહિતૃકલત્રત્રાણભારાર્દિતાનામ્ ।
વિષમવિષયતોયે મજ્જતામપ્લવાનાં
ભવતુ શરણમેકો વિષ્ણુપોતો નરાણામ્ ॥ ૧૨॥

ભવજલધિમગાધં દુસ્તરં નિસ્તરેયં
કથમહમિતિ ચેતો મા સ્મ ગાઃ કાતરત્વમ્ ।
સરસિજદૃશિ દેવે તારકી ભક્તિરેકા  var  તાવકી
નરકભિદિ નિષણ્ણા તારયિષ્યત્યવશ્યમ્ ॥ ૧૩॥ ॥ કા ૧૦॥

તૃષ્ણાતોયે મદનપવનોદ્ધૂતમોહોર્મિમાલે
દારાવર્તે તનયસહજગ્રાહસઙ્ઘાકુલે ચ ।
સંસારાખ્યે મહતિ જલધૌ મજ્જતાં નસ્ત્રિધામન્
પાદામ્ભોજે વરદ ભવતો ભક્તિનાવં પ્રયચ્છ ॥ ૧૪॥ ॥ કા ૧૧॥

માદ્રાક્ષં ક્ષીણપુણ્યાન્ક્ષણમપિ ભવતો ભક્તિહીનાન્પદાબ્જે
માશ્રૌષં શ્રાવ્યબન્ધં તવ ચરિતમપાસ્યાન્યદાખ્યાનજાતમ્ । var શ્રાવ્યબદ્ધં
માસ્માર્ષં માધવ ત્વામપિ ભુવનપતે ચેતસાપહ્નુવાનાન્ var માસ્પ્રાક્ષં
માભૂવં ત્વત્સપર્યાપરિકરરહિતો જન્મજન્માન્તરેઽપિ ॥ ૧૫॥ ॥ કા ૨૩॥ var ત્વત્સપર્યાવ્યતિકરરહિતો

જિહ્વે કીર્તય કેશવં મુરરિપું ચેતો ભજ શ્રીધરં
પાણિદ્વન્દ્વ સમર્ચયાચ્યુતકથાઃ શ્રોત્રદ્વય ત્વં શ◌ृણુ ।
કૃષ્ણં લોકય લોચનદ્વય હરેર્ગચ્છાઙ્ઘ્રિયુગ્માલયં
જિઘ્ર ઘ્રાણ મુકુન્દપાદતુલસીં મૂર્ધન્ નમાધોક્ષજમ્ ॥ ૧૬॥ ॥ કા ૨૬॥

હે લોકાઃ શ્રુણુત પ્રસૂતિમરણવ્યાધેશ્ચિકિત્સામિમાં var ભો લોકાઃ
યોગજ્ઞાઃ સમુદાહરન્તિ મુનયો યાં યાજ્ઞવલ્ક્યાદયઃ ।
અન્તર્જ્યોતિરમેયમેકમમૃતં કૃષ્ણાખ્યમાપીયતાં
તત્પીતં પરમૌષધં વિતનુતે નિર્વાનમત્યન્તિકમ્ ॥ ૧૭॥ ॥ કા ૧૮॥ var યત્પિતં

હે મર્ત્યાઃ પરમં હિતં શ્રુણુત વો વક્ષ્યામિ સઙ્ક્ષેપતઃ
સંસારાર્ણવમાપદૂર્મિબહુલં સમ્યક્ પ્રવિશ્ય સ્થિતાઃ ।
નાનાજ્ઞાનમપાસ્ય ચેતસિ નમો નારાયણાયેત્યમું
મન્ત્રં સપ્રણવં પ્રણામસહિતં પ્રાવર્તયધ્વં મુહુઃ ॥ ૧૮॥

પૃથ્વીરેણુરણુઃ પયાંસિ કણિકાઃ ફલ્ગુસ્ફુલિઙ્ગોઽનલ -
સ્તેજો નિઃશ્વસનં મરુત્ તનુતરં રન્ધ્રં સુસૂક્ષ્મં નભઃ ।
ક્ષુદ્રા રુદ્રપિતામહપ્રભૃતયઃ કીટાઃ સમસ્તાઃ સુરા
દૃષ્ટે યત્ર સ તાવકો વિજયતે॑ ભૂમાવધૂતાવધિઃ ॥ ૧૯॥ ॥ કા ૧૨॥

બદ્ધેનાઞ્જલિના નતેન શિરસા ગાત્રૈઃ સરોમોદ્ગમૈઃ
કણ્ઠેન સ્વરગદ્ગદેન નયનેનોદ્ગીર્ણબાષ્પામ્બુના ।
નિત્યં ત્વચ્ચરણારવિન્દયુગલધ્યાનામૃતાસ્વાદિનાં
અસ્માકં સરસીરુહાક્ષ સતતં સમ્પદ્યતાં જીવિતમ્ ॥ ૨૦॥ ॥ કા ૧૯॥

હે ગોપાલક હે કૃપાજલનિધે હે સિન્ધુકન્યાપતે
હે કંસાન્તક હે ગજેન્દ્રકરુણાપારીણ હે માધવ ।
હે રામાનુજ હે જગત્ત્રયગુરો હે પુણ્ડરીકાક્ષ માં
હે ગોપીજનનાથ પાલય પરં જાનામિ ન ત્વાં વિના ॥ ૨૧॥

ભક્તાપાયભુજઙ્ગગારુડમણિસ્ત્રૈલોક્યરક્ષામણિર્ var ભક્તાદ્વેષિ
ગોપીલોચનચાતકામ્બુદમણિઃ સૌન્દર્યમુદ્રામણિઃ
યઃ કાન્તામણિરુક્મિણીઘનકુચદ્વન્દ્વૈકભૂષામણિઃ var શ્રી કાન્તા
શ્રેયો દેવશિખામણિર્દિશતુ નો ગોપાલચૂડામણિઃ ॥ ૨૨॥ ॥ કા ૨૮॥ var શ્રેયો ધ્યેય

શત્રુચ્છેદૈકમન્ત્રં સકલમુપનિષદ્વાક્યસમ્પૂજ્યમન્ત્રં
સંસારોત્તારમન્ત્રં સમુચિતતમસઃ સઙ્ઘનિર્યાણમન્ત્રમ્ । var સમુદિતમનસાં
સર્વૈશ્વર્યૈકમન્ત્રં વ્યસનભુજગસન્દષ્ટસન્ત્રાણમન્ત્રં
જિહ્વે શ્રીકૃષ્ણમન્ત્રં જપ જપ સતતં જન્મસાફલ્યમન્ત્રમ્ ॥ ૨૩॥ ॥ કા ૨૯ ॥

વ્યામોહપ્રશમૌષધં મુનિમનોવૃત્તિપ્રવૃત્ત્યૌષધં var
વ્યામોહોદ્દલનૌષધં
દૈત્યેન્દ્રાર્તિકરૌષધં ત્રિજગતાં સઞ્જીવનૈકૌષધમ્ । var
દૈત્યાનર્થકરૌષધં
ભક્તાત્યન્તહિતૌષધં ભવભયપ્રધ્વંસનૈકૌષધં var
ભક્તાર્તિપ્રશમૌષધં ભવભયપ્રધ્વંસિ દિવ્યૌષધં
શ્રેયઃપ્રાપ્તિકરૌષધં પિબ મનઃ શ્રીકૃષ્ણદિવ્યૌષધમ્ ॥ ૨૪॥ ॥ કા ૩૦ ॥ var શ્રીકૃષ્ણનામૌષધમ્

આમ્નાયાભ્યસનાન્યરણ્યરુદિતં વેદવ્રતાન્યન્વહં var કૃચ્છ્રવ્રતાન્યન્વહં
મેદશ્છેદફલાનિ પૂર્તવિધયઃ સર્વં હુતં ભસ્મનિ । var મેદચ્છેદપદાનિ
તીર્થાનામવગાહનાનિ ચ ગજસ્નાનં વિના યત્પદ -
દ્વન્દ્વામ્ભોરુહસંસ્મૃતિં વિજયતે દેવઃ સ નારાયણઃ ॥ ૨૫॥ ॥ કા ૧૩॥ var દ્વન્દ્વામ્ભોરુહસંસ્તુતિં

શ્રીમન્નામ પ્રોચ્ય નારાયણાખ્યં
કેન પ્રાપુર્વાઞ્છિતં પાપિનોઽપિ । var યેન
હા નઃ પૂર્વં વાક્પ્રવૃત્તા ન તસ્મિં -
સ્તેન પ્રાપ્તં ગર્ભવાસાદિદુઃખમ્ ॥ ૨૬॥ ॥ કા ૨૨॥

મજ્જન્મનઃ ફલમિદં મધુકૈટભારે
મત્પ્રાર્થનીયમદનુગ્રહ એષ એવ ।
ત્વદ્ભૃત્યભૃત્યપરિચારકભૃત્યભૃત્ય-

ભૃત્યસ્ય ભૃત્ય ઇતિ માં સ્મર લોકનાથ ॥ ૨૭॥

નાથે નઃપુરુષોત્તમે ત્રિજગતામેકાધિપે ચેતસા var શ્રીપુરુષોત્તમે
સેવ્યે સ્વસ્ય પદસ્ય દાતરિ પરે નારાયણે તિષ્ઠતિ ।
યં કઞ્ચિત્પુરુષાધમં કતિપયગ્રામેશમલ્પાર્થદં
સેવાયૈ મૃગયામહે નરમહો મૂઢા વરાકા વયમ્ ॥ ૨૮॥ ॥ કા ૧૭॥

મદન પરિહર સ્થિતિં મદીયે
મનસિ મુકુન્દપદારવિન્દધામ્નિ ।
હરનયનકૃશાનુના કૃશોઽસિ
સ્મરસિ ન ચક્રપરાક્રમં મુરારેઃ ॥ ૨૯॥ ॥ કા ૨૪॥

તત્ત્વં બ્રુવાણાનિ પરં પરસ્તાન્ var પરસ્માત્
મધુ ક્ષરન્તીવ મુદાવહાનિ । var અહો ક્ષરન્તીવ સુધાં પદાનિ ।
પ્રવર્તય પ્રાઞ્જલિરસ્મિ જિહ્વે var આવર્તય
નામાનિ નારાયણગોચરાણિ ॥ ૩૦॥ ॥ કા ૨૦॥

ઇદં શરીરં પરિણામપેશલં var શ્લથસન્ધિજર્જરં
પતત્યવશ્યં પરિણામપેશલમ્ । var પતત્યવશ્યં શ્લથસંધિ જર્જરમ્ ।
કિમૌષધૈઃ ક્લિશ્યસિ મૂઢ દુર્મતે
નિરામયં કૃષ્ણરસાયનં પિબ ॥ ૩૧॥ ॥ કા ૨૧॥

દારા વારાકરવરસુતા તે તનૂજો વિરિઞ્ચિઃ var તેઽઙ્ગજોઽયં
સ્તોતા વેદસ્તવ સુરગણો ભૃત્યવર્ગઃ પ્રસાદઃ ।
મુક્તિર્માયા જગદ્ અવિકલં તાવકી દેવકી તે var મુક્તિર્મધ્યે
માતા મિત્રં બલરિપુસુતસ્તત્ત્વદન્યંન જાને ॥ ૩૨॥ ॥ કા ૨૫॥ var બલરિપુસુતસ્તત્ત્વતોઽન્યન્ન

કૃષ્ણો રક્ષતુ નો જગત્ત્રયગુરુઃ કૃષ્ણં નમધ્વં સદા
કૃષ્ણેનાખિલશત્રવો વિનિહતાઃ કૃષ્ણાય તસ્મૈ નમઃ ।
કૃષ્ણાદેવ સમુત્થિતં જગદિદં કૃષ્ણસ્ય દાસોઽસ્મ્યહં
કૃષ્ણે તિષ્ઠતિ વિશ્વમેતદ્ અખિલં હે! કૃષ્ણ રક્ષસ્વ મામ્ ॥ ૩૩॥

તત્ ત્વં પ્રસીદ ભગવન્ કુરુ મય્યનાથે
વિષ્ણો કૃપાં પરમકારુણિકઃ ખલુ ત્વમ્ ।
સંસારસાગરનિમગ્નમનન્ત દીનં
ઉદ્ધર્તુમર્હસિ હરે પુરુષોત્તમોઽસિ ॥ ૩૪॥

નમામિ નારાયણપાદપઙ્કજં
કરોમિ નારાયણપૂજનં સદા ।
વદામિ નારાયણનામ નિર્મલં
સ્મરામિ નારાયણતત્ત્વમવ્યયમ્ ॥ ૩૫॥

શ્રીનાથ નારાયણ વાસુદેવ
શ્રીકૃષ્ણ ભક્તપ્રિય ચક્રપાણે ।
શ્રીપદ્મનાભાચ્યુત કૈટભારે
શ્રીરામ પદ્માક્ષ હરે મુરારે ॥ ૩૬॥

અનન્ત વૈકુણ્ઠ મુકુન્દ કૃષ્ણ   var  આનન્દ ગોવિન્દ મુકુન્દ રામ
ગોવિન્દ દામોદર માધવેતિ ।   var  નારાયણાનન્ત નિરામયેતિ ।
વક્તું સમર્થોઽપિ ન વક્તિ કશ્ચિત્
અહો જનાનાં વ્યસનાભિમુખ્યમ્ ॥ ૩૭॥   ॥ કા ૧૪ ॥   var  વ્યસનાનિમોક્ષે

ધ્યાયન્તિ યે વિષ્ણુમનન્તમવ્યયં
હૃત્પદ્મમધ્યે સતતં વ્યવસ્થિતમ્ ।
સમાહિતાનાં સતતાભયપ્રદં
તે યાન્તિ સિદ્ધિં પરમાં તુ વૈષ્ણવીમ્ ॥ ૩૮॥

ક્ષીરસાગરતરઙ્ગશીકરા -
સારતારકિતચારુમૂર્તયે ।
ભોગિભોગશયનીયશાયિને
માધવાય મધુવિદ્વિષે નમઃ ॥ ૩૯॥   ॥ કા ૧૫॥

યસ્ય પ્રિયૌ શ્રુતિધરૌ કવિલોકવીરૌ   var  કવિલોકગીતૌ
મિત્રે દ્વિજન્મવરપદ્મશરાવભૂતામ્ ।   var  દ્વિજન્મપરિવારશિવાવભૂતામ્ ।
તેનામ્બુજાક્ષચરણામ્બુજષટ્પદેન
રાજ્ઞા કૃતા કૃતિરિયં કુલશેખરેણ ॥ ૪૦॥   ॥ કા ૩૪॥   var  સ્તુતિરિયં

॥ ઇતિ શ્રીકુલશેખરેણ વિરચિતા મુકુન્દમાલા સમ્પૂર્ણા ॥

---

સંસ્કરણ્ - ૨ શ્લોક સંખ્યા ૫૪

વન્દે મુકુન્દમરવિન્દદલાયતાક્ષં
કુન્દેન્દુશઙ્ખદશનં શિશુગોપવેષમ્ ।

ઇન્દ્રાદિદેવગણવન્દિતપાદપીઠં
વૃન્દાવનાલયમહં વસુદેવસૂનુમ્ ॥ ૧॥ ॥ કા ૧॥

શ્રીવલ્લભેતિ વરદેતિ દયાપરેતિ
ભક્તપ્રિયેતિ ભવલુણ્ઠનકોવિદેતિ ।
નાથેતિ નાગશયનેતિ જગન્નિવાસેત્ય્
આલાપિનં પ્રતિદિનં કુરુ માં મુકુન્દ ॥ ૨॥ ॥ કા ??॥

જયતુ જયતુ દેવો દેવકીનન્દનોઽયં
જયતુ જયતુ કૃષ્ણો વૃષ્ણિવંશપ્રદીપઃ ।
જયતુ જયતુ મેઘશ્યામલઃ કોમલાઙ્ગો
જયતુ જયતુ પૃથ્વીભારનાશો મુકુન્દઃ ॥ ૩॥ ॥ કા ૨॥

મુકુન્દ મૂર્ધ્ના પ્રણિપત્ય યાચે
ભવન્તમેકાન્તમિયન્તમર્થમ્ ।
અવિસ્મૃતિસ્ત્વચ્ચરણારવિન્દે
ભવે ભવે મેઽસ્તુ ભવત્પ્રસાદાત્ ॥ ૪॥ ॥ કા ૩॥

નાહં વન્દે તવ ચરણયોર્દ્વન્દ્વમદ્વન્દ્વહેતોઃ
કુમ્ભીપાકં ગુરુમપિ હરે નારકં નાપનેતુમ્ ।
રમ્યારામામૃદુતનુલતા નન્દને નાપિ રન્તું
ભાવે ભાવે હૃદયભવને ભાવયેયં ભવન્તમ્ ॥ ૫॥ ॥ કા ૫॥

નાસ્થા ધર્મે ન વસુનિચયે નૈવ કામોપભોગે
યદ્ ભાવ્યં તદ્ ભવતુ ભગવન્પૂર્વકર્માનુરૂપમ્ ।
એતત્પ્રાર્થ્યં મમ બહુમતં જન્મજન્માન્તરેઽપિ
ત્વત્પાદામ્ભોરુહયુગગતા નિશ્ચલા ભક્તિરસ્તુ ॥ ૬॥ ॥ કા ૬॥

દિવિ વા ભુવિ વા મમાસ્તુ વાસો
નરકે વા નરકાન્તક પ્રકામમ્ ।
અવધીરિતશારદારવિન્દૌ
ચરણૌ તે મરણેઽપિ ચિન્તયામિ ॥ ૭॥ ॥ કા ૭॥

ચિન્તયામિ હરિમેવ સન્તતં
મન્દહાસમુદિતાનનામ્બુજં
નન્દગોપતનયં પરાત્ પરં
નારદાદિમુનિવૃન્દવન્દિતમ્ ॥ ૮॥ ॥ કા ??॥

કરચરણસરોજે કાન્તિમન્નેત્રમીને
શ્રમમુષિ ભુજવીચિવ્યાકુલેઽગાધમાર્ગે ।
હરિસરસિ વિગાહ્યાપીય તેજોજલૌઘં
ભવમરુપરિખિન્નઃ ક્લેશમદ્ય ત્યજામિ ॥ ૯॥ ॥ કા ??॥

સરસિજનયને સશઙ્ખચક્રે
મુરભિદિ મા વિરમસ્વ ચિત્ત રન્તુમ્ ।    var  વિરમેહ
સુખતરમપરં ન જાતુ જાને  var  સુખકર
હરિચરણસ્મરણામૃતેન તુલ્યમ્ ॥ ૧૦॥ ॥ કા ૮॥

માભીર્મન્દમનો વિચિન્ત્ય બહુધા યામીશ્ચિરં યાતનાઃ   var  માભૈર્મન્દમનો
નામી નઃ પ્રભવન્તિ પાપરિપવઃ સ્વામી નનુ શ્રીધરઃ ।
આલસ્યં વ્યપનીય ભક્તિસુલભં ધ્યાયસ્વ નારાયણં
લોકસ્ય વ્યસનાપનોદનકરો દાસસ્ય કિં ન ક્ષમઃ ॥ ૧૧॥ ॥ કા ૯॥

ભવજલધિગતાનાં દ્વન્દ્વવાતાહતાનાં
સુતદુહિતૃકલત્રત્રાણભારાર્દિતાનામ્ ।
વિષમવિષયતોયે મજ્જતામપ્લવાનાં
ભવતુ શરણમેકો વિષ્ણુપોતો નરાણામ્ ॥ ૧૨॥

ભવજલધિમગાધં દુસ્તરં નિસ્તરેયં
કથમહમિતિ ચેતો મા સ્મ ગાઃ કાતરત્વમ્ ।
સરસિજદૃશિ દેવે તારકી ભક્તિરેકા  var  તાવકી
નરકભિદિ નિષણ્ણા તારયિષ્યત્યવશ્યમ્ ॥ ૧૩॥ ॥ કા ૧૦॥

તૃષ્ણાતોયે મદનપવનોદ્ધૂતમોહોર્મિમાલે
દારાવર્તે તનયસહજગ્રાહસઙ્ઘાકુલે ચ ।
સંસારાખ્યે મહતિ જલધૌ મજ્જતાં નસ્ત્રિધામન્
પાદામ્ભોજે વરદ ભવતો ભક્તિનાવં પ્રયચ્છ ॥ ૧૪॥ ॥ કા ૧૧॥

પૃથ્વીરેણુરણુઃ પયાંસિ કણિકાઃ ફલ્ગુસ્ફુલિઙ્ગોઽનલ -
સ્તેજો નિઃશ્વસનં મરુત્ તનુતરં રન્ધ્રં સુસૂક્ષ્મં નભઃ ।
ક્ષુદ્રા રુદ્રપિતામહપ્રભૃતયઃ કીટાઃ સમસ્તાઃ સુરા
દૃષ્ટે યત્ર સ તાવકો વિજયતે ભૂમાવધૂતાવધિઃ ॥ ૧૫॥ ॥ કા ૧૨॥

હે લોકાઃ શ્રુણુત પ્રસૂતિમરણવ્યાધેશ્ચિકિત્સામિમાં   var  ભો લોકાઃ
યોગજ્ઞાઃ સમુદાહરન્તિ મુનયો યાં યાજ્ઞવલ્ક્યાદયઃ ।
અન્તર્જ્યોતિરમેયમેકમમૃતં કૃષ્ણાખ્યમાપીયતાં
તત્પીતં પરમૌષધં વિતનુતે નિર્વાનમત્યન્તિકમ્ ॥ ૧૬॥  ॥ કા ૧૮॥    var  યત્પિતં

હે મર્ત્યાઃ પરમં હિતં શ્રુણુત વો વક્ષ્યામિ સઙ્ક્ષેપતઃ
સંસારાર્ણવમાપદૂર્મિબહુલં સમ્યક્ પ્રવિશ્ય સ્થિતાઃ ।
નાનાજ્ઞાનમપાસ્ય ચેતસિ નમો નારાયણાયેત્યમું
મન્ત્રં સપ્રણવં પ્રણામસહિતં પ્રાવર્તયધ્વં મુહુઃ ॥ ૧૭॥

નાથે નઃપુરુષોત્તમે ત્રિજગતામેકાધિપે ચેતસા  var  શ્રીપુરુષોત્તમે
સેવ્યે સ્વસ્ય પદસ્ય દાતરિ પરે નારાયણે તિષ્ઠતિ ।
યં કઞ્ચિત્પુરુષાધમં કતિપયગ્રામેશમલ્પાર્થદં
સેવાયૈ મૃગયામહે નરમહો મૂઢા વરાકા વયમ્ ॥ ૧૮॥  ॥ કા ૧૭॥

બદ્ધેનાઞ્જલિના નતેન શિરસા ગાત્રૈઃ સરોમોદ્ગમૈઃ
કણ્ઠેન સ્વરગદ્ગદેન નયનેનોદ્ગીર્ણબાષ્પામ્બુના ।
નિત્યં ત્વચ્ચરણારવિન્દયુગલધ્યાનામૃતાસ્વાદિનાં
અસ્માકં સરસીરુહાક્ષ સતતં સમ્પદ્યતાં જીવિતમ્ ॥ ૧૯॥  ॥ કા ૧૯॥

યત્ કૃષ્ણપ્રણિપાતધૂલિધવલં તદ્ વર્ષ્મ તદ્ વૈ શિરસ્   var   તદ્વૈ શિરઃ સ્યાચ્છુમં
તે નેત્રે તમસોજ્ઝિતે સુરુચિરે યાભ્યાં હરિર્દૃશ્યતે ।
સા બુદ્ધિર્વિમલેન્દુશઙ્ખધવલા યા માધવાધ્યાયિની     var  બુદ્ધિર્નિયમૈર્યમૈશ્ચ વિમલા
સા જિહ્વામૃતવર્ષિણી પ્રતિપદં યા સ્તૌતિ નારાયણમ્ ॥ ૨૦॥  ॥ કા ૨૭॥

જિહ્વે કીર્તય કેશવં મુરરિપું ચેતો ભજ શ્રીધરં
પાણિદ્વન્દ્વ સમર્ચયાચ્યુતકથાઃ શ્રોત્રદ્વય ત્વં શ‍ૃણુ ।
કૃષ્ણં લોકય લોચનદ્વય હરેર્ગચ્છાઙ્ઘ્રિયુગ્માલયં
જિઘ્ર ઘ્રાણ મુકુન્દપાદતુલસીં મૂર્ધન્ નમાધોક્ષજમ્ ॥ ૨૧॥  ॥ કા ૨૬॥

આમ્નાયાભ્યસનાન્યરણ્યરુદિતં વેદવ્રતાન્યન્વહં   var  કૃચ્છ્રવ્રતાન્યન્વહં
મેદશ્છેદફલાનિ પૂર્તવિધયઃ સર્વં હુતં ભસ્મનિ ।    var  મેદચ્છેદપદાનિ
તીર્થાનામવગાહનાનિ ચ ગજસ્નાનં વિના યત્પદ -
દ્વન્દ્વામ્ભોરુહસંસ્મૃતિં વિજયતે દેવઃ સ નારાયણઃ ॥ ૨૨॥  ॥ કા ૧૩॥   var  દ્વન્દ્વામ્ભોરુહસંસ્તુતિં

મદન પરિહર સ્થિતિં મદીયે
મનસિ મુકુન્દપદારવિન્દધામ્નિ ।

હરનયનકૃશાનુના કૃશોઽસિ
સ્મરસિ ન ચક્રપરાક્રમં મુરારેઃ ॥ ૨૩॥ ॥ કા ૨૪॥

નાથે ધાતરિ ભોગિભોગશયને નારાયણે માધવે
દેવે દેવકીનન્દને સુરવરે ચક્રાયુધે શાર્ઙ્ગિણિ ।
લીલાશેષજગત્પ્રપઞ્ચજઠરે વિશ્વેશ્વરે શ્રીધરે
ગોવિન્દે કુરુ ચિત્તવૃત્તિમચલામન્યૈસ્તુ કિં વર્તનૈઃ ॥ ૨૪॥

માદ્રાક્ષં ક્ષીણપુણ્યાન્ક્ષણમપિ ભવતો ભક્તિહીનાન્પદાબ્જે
માશ્રૌષં શ્રાવ્યબન્ધં તવ ચરિતમપાસ્યાન્યદાખ્યાનજાતમ્ । var શ્રાવ્યબદ્ધં
માસ્માર્ષં માધવ ત્વામપિ ભુવનપતે ચેતસાપહ્નુવાનાન્ var માસ્પ્રાક્ષં
માભૂવં ત્વત્સપર્યાપરિકરરહિતો જન્મજન્માન્તરેઽપિ ॥ ૨૫॥ ॥ કા ૨૩॥ var ત્વત્સપર્યાવ્યતિકરરહિતો

મજ્જન્મનઃ ફલમિદં મધુકૈટભારે
મત્પ્રાર્થનીયમદનુગ્રહ એષ એવ ।
ત્વદ્ભૃત્યભૃત્યપરિચારકભૃત્યભૃત્ય-
ભૃત્યસ્ય ભૃત્ય ઇતિ માં સ્મર લોકનાથ ॥ ૨૬॥

તત્ત્વં બ્રુવાણાનિ પરં પરસ્તાન્ var પરસ્માત્
મધુ ક્ષરન્તીવ મુદાવહાનિ । var અહો ક્ષરન્તીવ સુધાં પદાનિ ।
પ્રવર્તય પ્રાઞ્જલિરસ્મિ જિહ્વે var આવર્તય
નામાનિ નારાયણગોચરાણિ ॥ ૨૭॥ ॥ કા ૨૦॥

નમામિ નારાયણપાદપઙ્કજં
કરોમિ નારાયણપૂજનં સદા ।
વદામિ નારાયણનામ નિર્મલં
સ્મરામિ નારાયણતત્ત્વમવ્યયમ્ ॥ ૨૮॥

શ્રીનાથ નારાયણ વાસુદેવ
શ્રીકૃષ્ણ ભક્તપ્રિય ચક્રપાણે ।
શ્રીપદ્મનાભાચ્યુત કૈટભારે
શ્રીરામ પદ્માક્ષ હરે મુરારે ॥ ૨૯॥

અનન્ત વૈકુણ્ઠ મુકુન્દ કૃષ્ણ var આનન્દ ગોવિન્દ મુકુન્દ રામ
ગોવિન્દ દામોદર માધવેતિ । var નારાયણાનન્ત નિરામયેતિ ।
વક્તું સમર્થોઽપિ ન વક્તિ કશ્ચિત્
અહો જનાનાં વ્યસનાભિમુખ્યમ્ ॥ ૩૦॥ ॥ કા ૧૪ ॥ var વ્યસનાનિમોક્ષે

ભક્તાપાયભુજઙ્ગગારુડમણિસ્ત્રૈલોક્યરક્ષામણિર્ var ભક્તાદ્વેષિ
ગોપીલોચનચાતકામ્બુદમણિઃ સૌન્દર્યમુદ્રામણિઃ
યઃ કાન્તામણિરુક્મિણીઘનકુચદ્વન્દ્વૈકભૂષામણિઃ var શ્રી કાન્તા
શ્રેયો દેવશિખામણિર્દિશતુ નો ગોપાલચૂડામણિઃ ॥ ૩૧॥ ॥ કા ૨૮॥ var શ્રેયો ધ્યેય

શત્રુચ્છેદૈકમન્ત્રં સકલમુપનિષદ્વાક્યસમ્પૂજ્યમન્ત્રં
સંસારોત્તારમન્ત્રં સમુચિતતમસઃ સઙ્ઘનિર્યાણમન્ત્રમ્ । var સમુદિતમનસાં
સર્વૈશ્વર્યૈકમન્ત્રં વ્યસનભુજગસન્દષ્ટસન્ત્રાણમન્ત્રં
જિહ્વે શ્રીકૃષ્ણમન્ત્રં જપ જપ સતતં જન્મસાફલ્યમન્ત્રમ્ ॥ ૩૨॥ ॥ કા ૨૯ ॥

વ્યામોહપ્રશમૌષધં મુનિમનોવૃત્તિપ્રવૃત્ત્યૌષધં var
વ્યામોહોદ્દલનૌષધં
દૈત્યેન્દ્રાર્તિકરૌષધં ત્રિજગતાં સઞ્જીવનૈકૌષધમ્ । var
દૈત્યાનર્થકરૌષધં
ભક્તાત્યન્તહિતૌષધં ભવભયપ્રધ્વંસનૈકૌષધં var
ભક્તાર્તિપ્રશમૌષધં ભવભયપ્રધ્વંસિ દિવ્યૌષધં
શ્રેયઃપ્રાપ્તિકરૌષધં પિબ મનઃ શ્રીકૃષ્ણદિવ્યૌષધમ્ ॥ ૩૩॥ ॥ કા ૩૦ ॥ var શ્રીકૃષ્ણનામૌષધમ્

કૃષ્ણ ત્વદીયપદપઙ્કજપઞ્જરાન્તં
અદ્યૈવ મે વિશતુ માનસરાજહંસઃ ।
પ્રાણપ્રયાણસમયે કફવાતપિત્તૈઃ
કણ્ઠાવરોધનવિધૌ સ્મરણં કુતસ્તે ॥ ૩૪॥

ચેતશ્ચિન્તય કીર્તયસ્વ રસને નમ્રીભવ ત્વં શિરો
હસ્તાવઞ્જલિસમ્પુટં રચયતં વન્દસ્વ દીર્ઘં વપુઃ ।
આત્મન્ સંશ્રય પુણ્ડરીકનયનં નાગાચલેન્દ્રસ્થિતં
ધન્યં પુણ્યતમં તદેવ પરમં દૈવં હિ સંસિદ્ધયે ॥ ૩૫॥

શ‌ૃણ્વન્ જનાર્દનકથાગુણકીર્તનાનિ
દેહે ન યસ્ય પુલકોદ્ગમરોમરાજિઃ ।
નોત્પદ્યતે નયનયોર્વિમલામ્બુમાલા
ધિક્ તસ્ય જીવિતમહો પુરુષાધમસ્ય ॥ ૩૬॥

અન્ધસ્ય મે હૃતવિવેકમહાધનસ્ય
ચૌરૈઃ પ્રભો બલિભિરિન્દ્રિયનામધેયૈઃ ।

મોહાન્ધકૂપકુહરે વિનિપાતિતસ્ય
દેવેશ દેહિ કૃપણસ્ય કરાવલમ્બમ્ ॥ ૩૭॥

ઇદં શરીરં પરિણામપેશલં var શ્લથસન્ધિજર્જરં
પતત્યવશ્યં પરિણામપેશલમ્ । var પતત્યવશ્યં શ્લથસંધિ જર્જરમ્ ।
કિમૌષધૈઃ ક્લિશ્યસિ મૂઢ દુર્મતે
નિરામયં કૃષ્ણરસાયનં પિબ ॥ ૩૮॥ ॥ કા ૨૧॥

આશ્ચર્યમેતદ્ ધિ મનુષ્યલોકે
સુધાં પરિત્યજ્ય વિષં પિબન્તિ ।
નામાનિ નારાયણગોચરાણિ
ત્યક્ત્વાન્યવાચઃ કુહકાઃ પઠન્તિ ॥ ૩૯॥ ॥ કા ૩૧ ॥

ત્યજન્તુ બાન્ધવાઃ સર્વે
નિન્દન્તુ ગુરવો જનાઃ ।
તથાપિ પરમાનન્દો
ગોવિન્દો મમ જીવનમ્ઃ ॥ ૪૦॥

સત્યં બ્રવીમિ મનુજાઃ સ્વયમૂર્ધ્વબાહુર્
યો યો મુકુન્દ નરસિંહ જનાર્દનેતિ ।
જીવો જપત્યનુદિનં મરણે રણે વા
પાષાણકાષ્ઠસદૃશાય દદાત્યભીષ્ટમ્ ॥ ૪૧॥

નારાયણાય નમ ઇત્યમુમેવ મન્ત્રં
સંસારઘોરવિષનિર્હરણાય નિત્યમ્ ।
શ્ૃણ્વન્તુ ભવ્યમતયો યતયોઽનુરાગાદ્
ઉચ્ચૈસ્તરામુપદિશામ્યહમૂર્ધ્વબાહુઃ ॥ ૪૨॥

ચિત્તં નૈવ નિવર્તતે ક્ષણમપિ શ્રીકૃષ્ણપાદામ્બુજા -
ન્નિન્દન્તુ પ્રિયબાન્ધવા ગુરુજના ગૃહ્ણન્તુ મુઞ્ચન્તુ વા ।
દુર્વાદં પરિઘોષયન્તુ મનુજા વંશે કલઙ્કોઽસ્તુ વા
તાદૃક્પ્રેમધરાનુરાગમધુના મત્તાય માનં તુ મે ॥ ૪૩॥

કૃષ્ણો રક્ષતુ નો જગત્ત્રયગુરુઃ કૃષ્ણં નમધ્વં સદા
કૃષ્ણેનાખિલશત્રવો વિનિહતાઃ કૃષ્ણાય તસ્મૈ નમઃ ।
કૃષ્ણાદેવ સમુત્થિતં જગદિદં કૃષ્ણસ્ય દાસોઽસ્મ્યહં
કૃષ્ણે તિષ્ઠતિ વિશ્વમેતદ્ અખિલં હે! કૃષ્ણ રક્ષસ્વ મામ્ ॥ ૪૪॥

હે ગોપાલક હે કૃપાજલનિધે હે સિન્ધુકન્યાપતે
હે કંસાન્તક હે ગજેન્દ્રકરુણાપારીણ હે માધવ ।
હે રામાનુજ હે જગત્ત્રયગુરો હે પુણ્ડરીકાક્ષ માં
હે ગોપીજનનાથ પાલય પરં જાનામિ ન ત્વાં વિના ॥ ૪૫॥

દારા વારાકરવરસુતા તે તનૂજો વિરિઞ્ચિઃ var તેઽઙ્ગજોઽયં
સ્તોતા વેદસ્તવ સુરગણો ભૃત્યવર્ગઃ પ્રસાદઃ ।
મુક્તિર્માયા જગદ્ અવિકલં તાવકી દેવકી તે var મુક્તિર્મધ્યે
માતા મિત્રં બલરિપુસુતસ્તત્ત્વદન્યંન જાને ॥ ૪૬॥ ॥ કા ૨૫॥ var બલરિપુસુતસ્તત્ત્વતોઽન્યન્ન

પ્રણામમીશસ્ય શિરઃફલં વિદુઃ
તદર્ચનં પાણિફલં દિવૌકસઃ ।
મનઃફલં તદ્ગુણતત્ત્વચિન્તનં
વચઃફલં તદ્ગુણકીર્તનં બુધાઃ ॥ ૪૭॥

શ્રીમન્નામ પ્રોચ્ય નારાયણાખ્યં
કેન પ્રાપુર્વાઞ્છિતં પાપિનોઽપિ । var યેન
હા નઃ પૂર્વં વાક્પ્રવૃત્તા ન તસ્મિં-
સ્તેન પ્રાપ્તં ગર્ભવાસાદિદુઃખમ્ ॥ ૪૮॥ ॥ કા ૨૨॥

ધ્યાયન્તિ યે વિષ્ણુમનન્તમવ્યયં
હૃત્પદ્મમધ્યે સતતં વ્યવસ્થિતમ્ ।
સમાહિતાનાં સતતાભયપ્રદં
તે યાન્તિ સિદ્ધિં પરમાં તુ વૈષ્ણવીમ્ ॥ ૪૯॥

તત્ ત્વં પ્રસીદ ભગવન્ કુરુ મય્યનાથે
વિષ્ણો કૃપાં પરમકારુણિકઃ ખલુ ત્વમ્ ।
સંસારસાગરનિમગ્નમનન્ત દીનં
ઉદ્ધર્તુમર્હસિ હરે પુરુષોત્તમોઽસિ ॥ ૫૦॥

ક્ષીરસાગરતરઙ્ગશીકરા -
સારતારકિતચારુમૂર્તયે ।
ભોગિભોગશયનીયશાયિને
માધવાય મધુવિદ્વિષે નમઃ ॥ ૫૧॥ ॥ કા ૧૫॥

અલમલમલમેકા પ્રાણિનાં પાતકાનાં

નિરસનવિષયે યા કૃષ્ણ કૃષ્ણેતિ વાણી ।
યદિ ભવતિ મુકુન્દે ભક્તિરાનન્દસાન્દ્રા
કરતલકલિતા સા મોક્ષસમ્રાજ્યલક્ષ્મીઃ ॥ ૫૨॥

યસ્ય પ્રિયૌ શ્રુતિધરૌ કવિલોકવીરૌ var કવિલોકગીતૌ
મિત્રે દ્વિજન્મવરપદ્મશરાવભૂતામ્ । var દ્વિજન્મપરિવારશિવાવભૂતામ્ ।
તેનામ્બુજાક્ષચરણામ્બુજષટ્પદેન
રાજ્ઞા કૃતા કૃતિરિયં કુલશેખરેણ ॥ ૫૩॥ ॥ કા ૩૪॥ var સ્તુતિરિયં

મુકુન્દમાલાં પઠતાં નરાણાં
અશેષસૌખ્યં લભતે ન કઃ સ્વિત્ ।
સમસ્તપાપક્ષયમેત્ય દેહી
પ્રયાતિ વિષ્ણોઃ પરમં પદં તત્ ॥ ૫૪॥

॥ ઇતિ શ્રીકુલશેખરેણ વિરચિતા મુકુન્દમાલા સમ્પૂર્ણા ॥

---

Proofread by Madhavi U mupadrasta at gmail.com
Sequence based on mukundamAlA by Ravindra Seth in Hindi available at DLI.

Some pAThabehda/variations are observed in numbering of the verses.
This would offset numbers stated in the reference and above.

શ્રીગોવિન્દપદામ્ભોજમધુનો મહદદ્ભુતમ્ । var શ્રીમુકુન્દપદામ્ભોજમધુનઃ પરમાદ્ભુતમ્ ।
યત્પાયિનો ન મુહ્યન્તિ મુહ્યન્તિ યદપાયિનઃ ॥ ૫॥ ॥ કા ૪॥ var મુઞ્ચન્તિ મુઞ્ચન્તિ

રજસિ નિપતિતાનાં મોહજાલાવૃતાનાં
જનનમરણદોલાદુર્ગસંસર્ગગાનામ્ ।
શરણમશરણાનામેક એવાતુરાણાં
કુશલપથનિયુક્તશ્ચક્રપાણિર્નરાણામ્ ॥ ૧૬॥

અપરાધસહસ્રસઙ્કુલં
પતિતં ભીમભવાર્ણવોદરે ।
અગતિં શરણાગતં હરે
કૃપયા કેવલમાત્મસાત્ કુરુ ॥ ૧૭॥

મા મે સ્ત્રીત્વં મા ચ મે સ્યાત્ કુભાવો

મા મૂર્ખત્વં મા કુદેશેષુ જન્મ ।
મિથ્યાદૃષ્ટિર્મા ચ મે સ્યાત્ કદાચિત્
જાતૌ જાતૌ વિષ્ણુભક્તો ભવેયમ્ ॥ ૧૮॥

કાયેન વાચા મનસેન્દ્રિયૈર્વા
બુદ્ધ્યાત્મના વાનુસૃતિસ્વભાવાત્ ।
કરોમિ યદ્ યત્ સકલં પરસ્મૈ
નારાયણાયૈવ સમર્પયામિ ॥ ૧૯॥

યત્ કૃતં યત્ કરિષ્યામિ
તત્ સર્વં ન મયા કૃતમ્ ।
ત્વયા કૃતં તુ ફલભુક્
ત્વમેવ મધુસૂદન ॥ ૨૦॥

There are two variants to this stotra found in publications. Version 1 is more common, and 2 appears to be expanded by the devotees. The sequence differs and there are quite a few variations found among different prints.

---

*MukundamAlAstotram by Kulashekhara Versions 1 and 2*

pdf was typeset on October 24, 2024

Please send corrections to *sanskrit@cheerful.com*